CAREERS 360

PRACTICE Series

# RBSE CLASS 10

# Sanskrit

## Model Question Paper 2025

**प्रश्नपत्र-योजना – 2024 - 2025**

**कक्षा – प्रवेशिका**

**विषयः – संस्कृतम् - 95 (1)**

**समयः 3:15** (सपादहोरात्रयम्) **पूर्णांका – :80**

**प्रथमपत्रम्**

**1. उद्देशानाम् अङ्कभारः**

| क्र.सं. | उद्देश्यम् | अङ्कभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | ज्ञानम् | 26 | 32.50 |
| 2. | अवबोधः | 21 | 26.25 |
| 3. | ज्ञानोपयोगः | 19 | 23.75 |
| 4. | कौशलम् | 08 | 10.00 |
| 5. | विश्लेषणम् | 06 | 07.50 |
| | योगः | 80 | 100 |

**2. प्रश्नानां प्रकारानुसारम् अङ्कभारः**

| क्र.सं. | प्रश्नानां प्रकाराः | प्रश्नानां संख्याः | प्रतिप्रश्नम् अङ्काः | कुलाङ्काः | प्रतिशतम् (अङ्कानाम्) | प्रतिशतम्(प्रश्नानाम्) | सम्भावितः समयः |
|---|---|---|---|---|---|---|---|
| 1. | **बहुविकल्प.प्रश्नाः** | 1/18 | 1 | 18 | 22.50% | 33.96% | 20 निमेषाः |
| 2. | रिक्तस्थानप्रश्नाः | 1/06 | 1 | 06 | 07.50% | 11.32% | 10 निमेषाः |
| 3. | अतिलघूत्तरात्मकप्रश्नाः | 1/12 | 1 | 12 | 15.00% | 22.64% | 15 निमेषाः |
| 4. | लघूत्तरात्मकप्रश्नाः | 10/10 | 2 | 20 | 25.00% | 18.86% | 50 निमेषाः |
| 5. | दीर्घोत्तरीयप्रश्नाः | 04/04 | 3 | 12 | 15.00% | 07.54% | 50 निमेषाः |
| 6. | निबन्धात्मकप्रश्नाः | 03/03 | 4 | 12 | 15.00% | 05.66% | 50 निमेषाः |
| | योगः | 20/53 | | 80 | 100% | 100% | 195 निमेषाः |

**विकल्पयोजना – खण्ड-स-दयोः विद्यते।**

**3. विषयवस्तूनाम् अङ्कभारः –**

| क्र.सं. | विषयवस्तु | अङ्कभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | अजन्तपुंल्लिङ्गप्रकरणम् | 10 | 12.50 |
| 2. | अजन्तस्त्रीलिङ्गप्रकरणम् | 08 | 10.00 |
| 3. | अजन्तनपुंसकलिङ्गप्रकरणम् | 07 | 08.75 |
| 4. | अजन्तपुंल्लिङ्गप्रकरणम् | 10 | 12.50 |
| 5. | अजन्तस्त्रीलिङ्गप्रकरणम् | 08 | 10.00 |
| 6. | अजन्तनपुंसकलिङ्गप्रकरणम् | 07 | 08.75 |
| 7. | स्त्रीप्रत्ययप्रकरणम् | 10 | 12.50 |
| 8. | अव्ययप्रकरणम् | 05 | 06.25 |
| 9. | धातुरूपाणि | 05 | 06.25 |
| 10. | अभ्यासदर्शिनी | 10 | 12.50 |
| | योगः | 80 | 100 |

BSER

# प्रश्नपत्रस्य नीलपत्रम्

कक्षा – प्रवेशिका | विषयः – संस्कृतम् (प्रथमः) | समयः – सपादहोरात्रयम् | पूर्णाङ्काः 80

| क्र.सं. | उद्देश्यविधाः/उपविधाः | ज्ञानम् | | | | | | अवबोधः | | | | | | ज्ञानोपयोगः / अभिव्यक्तिः | | | | | | कौशलम्/मौलिकता | | | | | | विश्लेषणम् | | | | | | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | |
| 1. | अजन्तपुंल्लिङ्गप्रकरणम् | 1(1) | | | | | | | | | 2(1) | | 4(1) | | | | | 3(1) | | | | | | | | | | | | | | 10(4) |
| 2. | अजन्तस्त्रीलिङ्गप्रकरणम् | 1(-) | | | | | | | | | | | | | | | | 3(1) | | | | | | | 4(1) | | | | | | | 8(2) |
| 3. | अजन्तनपुंसकलिङ्गप्रकरणम् | 1(-) | 1(1) | 3(1) | | | | | | | 2(1) | | | | | | | | | | | | | | | | | | | | | 7(3) |
| 4. | अजन्तपुंल्लिङ्गप्रकरणम् | 1(-) | | | | | | | | | 2(1) | | | | | | | | | | | | | | 4(1) | | | | | 3(1) | | 10(3) |
| 5. | अजन्तस्त्रीलिङ्गप्रकरणम् | 1(-) | | | | | | | | | 4(2) | | | | | | | | | | | | | | | | | | | 3(1) | | 8(3) |
| 6. | अजन्तनपुंसकलिङ्गप्रकरणम् | 1(-) | 1(-) | 3(-) | | | | | | | 2(1) | | | | | | | | | | | | | | | | | | | | | 7(1) |
| 7. | स्त्रीप्रत्ययप्रकरणम् | 3(-) | | | | | | | 1(-) | 2(-) | | | | | | | 4(2) | | | | | | | | | | | | | | | 10(2) |
| 8. | अव्ययप्रकरणम् | 3(-) | | | | | | | 1(-) | 1(-) | | | | | | | | | | | | | | | | | | | | | | 5(-) |
| 9. | धातुरूपाणि | 3(-) | | | | | | | | | | | | | 1(-) | 1(-) | | | | | | | | | | | | | | | | 5(-) |
| 10. | अभ्यासदर्शिनी | 3(-) | | | | | | | | | | | | | 1(-) | 2(-) | 4(2) | | | | | | | | | | | | | | | 10(2) |
| | योगः | **18(1)** | **2(1)** | **6(1)** | | | | | 2(-) | 3(-) | 12(6) | | 4(1) | | **2(-)** | **3(-)** | **8(4)** | **6(2)** | | | | | | | **8(2)** | | | | | **6(2)** | | **80(20)** |
| | सर्वयोगः | **26(3)** | | | | | | **21(7)** | | | | | | **19(6)** | | | | | | **8(2)** | | | | | | **6(2)** | | | | | | **80(20)** |

अवधेयम्– कोष्ठकात् बहिः संख्या अंकबोधिका आंतरिकसंख्या च प्रश्नबोधिका।

विकल्पयोजना :- खण्ड–स–द–योः" प्रत्येकं प्रश्नः आन्तरिकविकल्पात्मकः अस्ति ।

यह ब्लू प्रिंट केवल मॉडल प्रश्न पत्र का है, बोर्ड का प्रश्न पत्र निर्धारित पाठ्यक्रम एवं अंक योजनानुसार ही होगा।

BSER

**No. of Questions- 20**
**No. of printed Pages –**

# प्रवेशिका-परीक्षा,2025

## आदर्शप्रश्न–पत्रम्

## कक्षा–प्रवेशिका

## विषयः - संस्कृतम् -95 (1)

**समयः 3:15** (सपादहोरात्रयम्)

**पूर्णांकाः – 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः-**

(1 ) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतो लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

BSER

## आदर्शप्रश्नपत्रम्

## कक्षा - प्रवेशिका

## विषयः - संस्कृतम् (प्रथमपत्रम्) कोड – 95 (1)

**समयः - 3:15 होराः** **पूर्णांकाः - 80**

### खण्डः – 'अ'

**1. बहुविकल्पात्मकप्रश्नाः-** **18x1 = 18**

**(i) सुप्-प्रत्ययो भवति -** 1

(अ) प्रथमायाम् (ब) चतुर्थ्याम् (स) षष्ठ्याम् (द) सप्तम्याम्

**(ii) आपः एकारः स्यात् -** 1

(अ) सम्बुद्धौ (ब)आङि (स)ओसि (द)सर्वत्र

**(iii) 'हे ! ज्ञान' इत्यत्र किं वचनम् ?** 1

(अ) एकवचनम् (ब) द्विवचनम् (स) त्रिवचनम् (द) बहुवचनम्

**(iv) भस्य वाहः सम्प्रसारणं भवति -** 1

(अ) ऊङ् (ब) ऊठ् (स) ऊह् (द) ऊढः

**(v) 'उपानत्' इत्यत्र को धातुः?** 1

(अ) नम् (ब) नत् (स) नह् (द) नद्

**(vi) 'स्वनडुही' इत्यत्र विभक्तिरस्ति –** **1**

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) प्रथमा-द्वितीये

**(vii) 'सर्वा' इत्यत्र प्रत्ययोऽस्ति –** **1**

(अ) डाप् (ब) चाप् (स) टा (द) टाप्

**(viii) 'स्त्रियाम्' इति सूत्रमस्ति -** **1**

(अ) विधिसूत्रम् (ब) संज्ञासूत्रम् (स) अधिकारसूत्रम् (द) अधिदेशसूत्रम्

**(ix) 'यञश्च' इति सूत्रेण भवति –** **1**

(अ) ङीप् (ब) ङीष् (स) ङीन् (द) ङिप्

**(x) 'नक्तम्' इत्यस्यार्थो भवति –** **1**

(अ) दिनम् (ब) नित्यम् (स) रात्रिः (द) समीपम्

**(xi) 'स्वरादिनिपातमव्ययम्' इत्यनेन भवति –** **1**

(अ) टाप्-प्रत्ययः (ब) अव्ययसंज्ञा (स) भावसंज्ञा (द) निपातसंज्ञा

BSER

**(xii) 'उदेतोः' इत्यत्र अव्ययसंज्ञाविधायकं सूत्रमस्ति –** **1**

(अ) त्त्वातोसुन्कसुनः (ब) कृन्मेजन्तः (स) स्वरादिनिपातमव्ययम् (द) अव्ययीभावश्च

**(xiii) 'गम्-धातोः लट्-लकारस्य रूपमस्ति -'** **1**

(अ) गमति (ब) गच्छति (स) अगच्छत् (द) गमिष्यति

**(xiv) 'अवादीत्' इत्यत्र लकारोऽस्ति –** **1**

(अ) लट् (ब) लिङ् (स) लुङ् (द) लङ्

**(xv) 'चुर्-धातोः विधिलिङ्-लकारस्य मध्यमपुरुष-बहुवचनरूपमस्ति -'** **1**

(अ) चोरयेत् (ब) चोरयेयुः (स) चोरयेम (द) चोरयेत

**(xvi) भवती ह्यः लेखं --------------।** **1**

(अ) लेखिष्यति (ब) अलिखत् (स) लिखति (द) लिखेत्

**(xvii) यद्यपि स उक्तवान् ------------- अहं तत्र न गतवान् ।** **1**

(अ) तदा (ब) तथापि (स) यथा (द) तथा

**(xviii) सा ------------- दुग्धं पिबति?** **1**

(अ) कति (ब) कियान् (स) कियत् (द) कियती

**2. रिक्तस्थानानि पूरयत-** $6x1 = 6$

(i) ह्रस्वो ............ प्रातिपदिकस्य। 1

(ii) अहन् इत्यस्य ---------- स्यात् पदान्ते। 1

(iii) इन्द्रवरुण--------------- आनुक्। 1

(iv) स्वरादयो निपाताश्च ---------- संज्ञाः स्युः। 1

(v) अचूचुरत् , -------------, अचूचुरन्। 1

(vi) छात्रः प्रतिदिनं ----------------- पठति। (वृक्षम्, पाठम्, स्यूतम्) 1

**3. अतिलघूत्तरात्मकप्रश्नाः -** $12x1 = 12$

(i) 'ज्ञानम्' इत्यत्र अमादेशः केन सूत्रेण भवति ? 1

(ii) क्लीबाद् औङः कः आदेशः? 1

(iii) 'कतरत्' इत्यत्र टेर्लोपः केन सूत्रेण भवति ? 1

(iv) 'अहोभ्याम्' इत्यत्र प्रातिपदिकं किम् ? **1**

BSER

(v) 'ददन्ति' इत्यत्र नुमागमः केन सूत्रेण भवति ? 1

(vi) 'अन्वादेशे नपुंसके वा एतद् वक्तव्यः' इति वार्तिकस्य किं कार्यम् ? 1

(vii) 'दीव्यन्ती' इत्यत्र ङीप्-प्रत्ययः केन सूत्रेण भवति ? 1

(viii) 'बह्वादिभ्यश्च' इति सूत्रेण किं भवति ? 1

(ix) 'प्रातः' इत्यस्य अर्थं विलिख्य वाक्यप्रयोगं कुरुत। 1

(x) सेव्-धातोः लिट्-लकारस्य प्रथमपुरुषस्य रूपाणि लिखत। 1

(xi) 'यदा - तदा' इत्यस्य वाक्यप्रयोगं कुरुत। 1

(xii) 'सह' इति अव्ययस्य वाक्यप्रयोगं कुरुत। 1

**खण्डः – 'ब'**

**लघूत्तरात्मकप्रश्नाः –** **10X2 = 20**

4. 'राः' इत्यस्य ससूत्रं सिद्धिः कार्या। 2
5. 'ज्ञाने' इत्यस्य ससूत्रं सिद्धिः कार्या। 2
6. 'रोः सुपि' इत्यस्य कोऽर्थः? 2
7. 'वाक्षु' इति रूपं साधयत। 2
8. 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इत्यस्य सोदाहरणमर्थो लेख्यः। 2
9. 'गवाञ्चि' इति रूपं साधयत। 2
10. 'अनडुही' इति रूपं साधयत। 2
11. 'पूर्वपदात्संज्ञायामगः' इत्यस्य सूत्रस्य सोदाहरणमर्थो लेख्यः। 2
12. अधोलिखित-पदसहायतया वाक्यनिर्माणं कुरुत। 2

    (अ) अत्र (ब) विना

13. अधोलिखित-पदसहायतया प्रश्ननिर्माणं कुरुत। 2

    (अ) किम् (ब) किमर्थम्

**खण्डः – 'स'**

**दीर्घोत्तरात्मकप्रश्नाः –**

14. अधोलिखितेषु कौचन द्वौ प्रयोगौ साधनीयौ। 3

    हे राम !, द्वितीयस्मै, पत्युः, बहुश्रेयस्यै

**15.** अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ। 3

    सर्वस्याः, क्रोष्ट्री, स्वसा, नौः

16. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ। 3

खञ्जौ, सध्र्यङ्, आभिः, चतस्रः

17. अधोलिखितेषु सूत्रेषु कयोश्चन द्वयोः सोदाहरणमर्थो लेख्यः। 3

यः सौ, अपो भि, नमुने, स्पृशोऽनुदके क्विन्

**खण्डः – 'द'**

18. निम्नलिखितेषु कयोश्चिद् द्वयोः सिद्धिर्विधेया। 4

धातारौ, गाः, रमयोः, मतीः

19. अधोलिखितेषु कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणमर्थो लेख्यः। 4

दीर्घाज्जसि च, इदुद्भ्याम्, स्त्रियाश्च, आतो धातोः

20. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ। 4

स्रुक्-स्रुग्, चत्वारः, एनयोः, युवाम्

BSER

प्रश्नपत्र-योजना – 2024 - 2025

**कक्षा – प्रवेशिका**

**विषयः – संस्कृतम् द्वितीयपत्रम् - 95 (2)**

**समयः 3:15** (सपादहोरात्रयम्) **पूर्णांका – :80**

**द्वितीयपत्रम्**

**1. उद्देशानाम् अङ्कभारः**

| क्र.सं. | उद्देश्यम् | अङ्कभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | ज्ञानम् | 24 | 30.00 |
| 2. | अवबोधः | 24 | 30.00 |
| 3. | ज्ञानोपयोगः | 17 | 21.25 |
| 4. | कौशलम् | 8 | 10.00 |
| 5. | विश्लेषणम् | 7 | 8.75 |
| | योगः | 80 | 100 |

**2. प्रश्नानां प्रकारानुसारम् अङ्कभारः**

| क्र.सं. | प्रश्नानां प्रकाराः | प्रश्नानां संख्याः | प्रतिप्रश्नम् अङ्काः | कुलाङ्काः | प्रतिशतम् (अङ्कानाम्) | प्रतिशतम्(प्रश्नानाम्) | सम्भावितः समयः |
|---|---|---|---|---|---|---|---|
| 1. | बहुविकल्पात्मकप्रश्नाः | 1/18 | 1 | 18 | 22.50% | 33.96% | 20 निमेषाः |
| 2. | रिक्तस्थानप्रश्नाः | 1/06 | 1 | 06 | 07.50% | 11.32% | 10 निमेषाः |
| 3. | अतिलघूत्तरात्मकप्रश्नाः | 1/12 | 1 | 12 | 15.00% | 22.64% | 15 निमेषाः |
| 4. | लघूत्तरात्मकप्रश्नाः | 10/10 | 2 | 20 | 25.00% | 18.86% | 50 निमेषाः |
| 5. | दीर्घोत्तरीयप्रश्नाः | 04/04 | 3 | 12 | 15.00% | 07.54% | 50 निमेषाः |
| 6. | निबन्धात्मकप्रश्नाः | 03/03 | 4 | 12 | 15.00% | 05.66% | 50 निमेषाः |
| | योगः | 20/53 | | 80 | 100% | 100% | 195 निमेषाः |

**विकल्पयोजना – खण्ड-स-दयोः विद्यते।**

**3. विषयवस्तूनाम् अङ्कभारः –**

| क्र.सं. | विषयवस्तु | अङ्कभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | गद्यकाव्यम् | 25 | 31.25 |
| 2. | रचना | 15 | 18.75 |
| 3. | पद्यकाव्यम् | 25 | 31.25 |
| 4. | छन्दांसि | 05 | 06.25 |
| 5. | अलङ्काराः | 05 | 06.25 |
| 6. | कोशः | 05 | 06.25 |
| | योगः | 80 | 100 |

## प्रश्नपत्रस्य नीलपत्रम्

**कक्षा – प्रवेशिका** **विषयः – संस्कृतम् (द्वितीयः)** **समयः – सपादहोरात्रयम्** **पूर्णाङ्काः - 80**

| क्र.सं. | उद्देश्यविधाः/उपविधाः | ज्ञानम् | | | | | | अवबोधः | | | | | | ज्ञानोपयोगः / अभिव्यक्तिः | | | | | | कौशलम्/मौलिकता | | | | | | विश्लेषणम् | | | | | | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | |
| 1. | गद्यकाव्यम् | 8(1) | 1(1) | | | | | | | 6(1) | | | | | | | 2(1) | | | | | | | | 4(1) | | | | | | 4(1) | 25(6) |
| 2. | रचना | 2(-) | 1(-) | | | | | | | 1(-) | | | | | | | 4(2) | 3(1) | | | | | | | 4(1) | | | | | | | 15(4) |
| 3. | पद्यकाव्यम् | 8(-) | 1(-) | | | | | | | 5(-) | | | | | | | 2(1) | 6(2) | | | | | | | | | | | | 3(1) | | 25(4) |
| 4. | छन्दांसि | | 1(-) | | | | | | | | 4(2) | | | | | | | | | | | | | | | | | | | | | 5(2) |
| 5. | अलङ्काराः | | 1(-) | | | | | | | | 4(2) | | | | | | | | | | | | | | | | | | | | | 5(2) |
| 6. | कोशः | | 1(-) | | | | | | | | 4(2) | | | | | | | | | | | | | | | | | | | | | 5(2) |
| | **योगः** | **18(1)** | **6(1)** | | | | | | | 12(1) | 12(6) | | | | | | **8(4)** | **9(3)** | | | | | | | **8(2)** | | | | | **3 (1)** | **4(1)** | **80(20)** |
| | **सर्वयोगः** | 24(2) | | | | | | 24(7) | | | | | | **17(7)** | | | | | | 8(2) | | | | | | **7(2)** | | | | | | **80(20)** |

विकल्पानां– योजना :–

अवधेयम्– कोष्ठकात् बहिः संख्या अंकबोधिका आंतरिकसंख्या च प्रश्नबोधिका।

खण्ड-स-दयोः आंतरिकविकल्पाः सन्ति।

यह ब्लू प्रिंट केवल मॉडल प्रश्न पत्र का है, बोर्ड का प्रश्न पत्र निर्धारित पाठ्यक्रम एवं अंक योजनानुसार ही होगा।

BSER

**No. of Questions- 20**
**No. of printed Pages –**

# प्रवेशिकापरीक्षा -2025

## आदर्शप्रश्न–पत्रम्

## कक्षा–प्रवेशिका

## विषयः – संस्कृतम्(द्वितीयपत्रम्) -95 (2)

**समयः 3:15** (सपादहोरात्रयम्)

**पूर्णांका: – 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः-**

(1 ) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतो लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि ।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

BSER

## आदर्शप्रश्नपत्रम्

## कक्षा - प्रवेशिका

## विषयः - संस्कृतम् (द्वितीपत्रम्) कोड – 95 (2)

**समयः - 3:15 (सपाद-होरात्रयम्)** **पूर्णांकाः - 80**

**खण्डः – 'अ'**

**1. बहुविकल्पात्मकप्रश्नाः-** 18x1 = 18

**(i) तपः कतिविधमुच्यते?** 1

(अ) द्विविधम् (ब) चतुर्विधम्

(स) त्रिविधम् (द) पञ्चविधम्

**(ii) कीदृशी भूमिः नानाफलं फलति -** 1

(अ) कल्पलतेव (ब)विद्यालतेव

(स) जीवनलतेव (द) विद्यालतेव

**(iii) कैकेयी प्रथमं वरं किं याचितवती?** 1

(अ) रामस्य राज्याभिषेकम् (ब) भरतस्य राज्याभिषेकः

(स) दण्डकारण्ये गमनम् (द) सीतायाः संरक्षणम्

**(iv) विवेकानन्दस्य दृष्टौ कः वन्द्यः?** 1

(अ) मृगः (ब) काकः

(स) हंसः (द) व्याघ्रः

**(v) मानधनाग्रयायी विधिज्ञः विशाम्मतिः कः?** 1

(अ) कौत्सः (ब) रघुः

(स) कुवेरः (द) महर्षिः वरतन्तुः

**(vi) 'वासांसि' इति पदस्य कोऽर्थ?** **1**

(अ) शरीराणि (ब) वाहनानि

(स) वस्त्राणि (द) धान्यानि

**(vii) आत्मानं केन उद्धरेत्?** **1**

(अ) स्वरेण (ब) शरीरेण

(स) आत्मना (द) शास्त्रेण

**(viii) कौत्सस्य विशेषणपदं नास्ति-** **1**

(अ) विधिज्ञः (ब) उपात्तविद्यः

BSER

(स) गुरुदक्षिणार्थी (द) वरतन्तुशिष्यः

**(ix) 'पति' शब्दस्य सप्तमीविभक्तेः एकवचनरूपं भवति-** **1**

(अ) पते (ब) पत्यौ

(स) पत्ये (द) पत्याम्

**(x) चुर्-धातोः लोट्-लकारे उत्तमपुरुषैकवचने रूपं भवति-** **1**

(अ) चोरय (ब) चोरयत

(स) चोरयानि (द) चोरयाणि

**(xi) पञ्चतन्त्रेषु नास्ति –** **1**

(अ) मित्रभेदः (ब) मित्रलोभः

(स) मित्रसम्प्राप्तिः (द) लब्धप्रणाशम्

**(xii) 'कम्बुग्रीवः' इति नाम कस्यास्ति?** **1**

(अ) काकस्य (ब) कच्छपस्य

(स) हंसस्य (द) मृगस्य

**(xiii) ताम्रचूडस्य मित्रम् आसीत्-** **1**

(अ) हिरण्यकः (ब) लघुपत्तनकः

(स) बृहत्स्फिक् (द) बिडालः

**(xiv) पिच्छमेकैकं परित्यजन्ति-** **1**

(अ) नवममासे-नवममासे (ब) पञ्चममासे-पञ्चममासे

(स) अष्टममासे-अष्टमासे (द) षष्ठमासे

**(xv) कोपाविष्टमनाः को जातः?** **1**

(अ) सिंहः (ब) शृगालः

(स) शृगाली (द) गजः

**(xvi) चाणक्येन बुद्ध्या के हताः?** **1**

(अ) नन्दाः (ब) शकाः

(स) खगाः (द) दुष्टाः

**(xvii) विधुरेऽपि काले किं न त्याज्यम्?** **1**

(अ) धनम् (ब) धैर्यम्

(स) वाहनम् (द) वचनम्

**(xviii) 'आगत्य' इत्यत्र कः प्रत्ययः?** **1**

BSER

(अ) ण्यत्　　　　(ब) यत्

(स) क्यप्　　　　(द) ल्यप्

**2. रिक्तस्थानानि पूरयत-** 　　　　6x1=6

(i) न च कृत्यं परित्याज्यमेष धर्मः-------------------------- । 1

(ii) पर्यायपीतस्य -----------------कलाक्षमः श्लाघ्यतरो हि वृद्धेः । 1

(iii) महाराणाप्रतापस्य जन्म -----------------वर्षे अभूत् । 1

(iv) नसमरसलागः षड्वेदैर्हयैः---------------मता । 1

(v) -----------------धर्मानलङ्कारान् प्रचक्षते । 1

(vi) विष्णुर्नारायणः कृष्णो वैकुण्ठो------------------- । 1

**3. अतिलघूत्तरात्मकप्रश्नाः -** 　　　　12x1=12

(i) मधु-शब्दस्य सम्बोधन-एकवचनरूपं लिखत। 1

(ii) कस्य त्रिविधं द्वारमुच्यते ? 1

(iii) करुणाकुलानां श्रोत्रं केन विभाति ? 1

(iv) रामं कैः तुल्यं विमलं धर्ममास्थितं विद्धि ? **1**

(v) कः निर्गलिताम्बुगर्भं शरद्घनं नार्दति ? 1

(vi) कूर्म इव कः काष्ठाद् भ्रष्टः विनश्यति ? 1

(vii) भिक्षापात्रं कः ताडयति स्म ? 1

(viii) केषां मध्ये द्वैधम् उत्पन्नम् ? 1

(ix) सिंही कति पुत्रान् अजीजनत् ? 1

(x) विवेकानन्देन धर्मग्लानिः कथं निरस्ता? 1

(xi) सहस्रधीः कुत्र स्थितः ? 1

(xii) 'हितम्' इत्यत्र को धातुः ? 1

BSER

## खण्डः – 'ब'

**लघूत्तरात्मकप्रश्नाः –** 10x2=20

4. मन्दाक्रान्तावृत्तस्य लक्षणं लेखनीयम्। 2

5. वर्णानां लघु-गुरु-व्यवस्थां लिखत। 2

6. रूपकालङ्कारस्य उदाहरणं लिखत। 2

7. अनुप्रासालङ्कारस्य लक्षणं लिखत। 2

8. अमरकोशानुसारं कामदेवस्य नामद्वयं लिखत। 2

9. शिवस्य कानिचन चत्वारि नामानि लेखनीयानि। 2

10. सखि-शब्दस्य (पुंल्लिङ्गम्) षष्ठीविभक्तेः रूपाणि लिखत। 2

11. अस्-धातोः लोट्-लकार-उत्तमपुरुषस्य रूपाणि लिखत। 2

12. पुरुषस्य कानि-कानि न फलन्ति। 2

13. 'बुद्धेर्बुद्धिमतां लोके' इति श्लोकं पूरयत। 2

## खण्डः – 'स'

**दीर्घोत्तरात्मकप्रश्नाः –**

**14. अधोलिखितयोः द्वयोः श्लोकयोः एकस्य श्लोकस्य सप्रसङ्ग-व्याख्या कार्या। 3**

(क) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा॥

(ख) श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणाकुलानां परोपकारेण न चन्दनेन॥

**15. अधोलिखितयोः द्वयोः श्लोकयोः एकस्य श्लोकस्य सप्रसङ्ग-व्याख्या कार्या। 3**

(क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

(ख) न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्।
यथा पितरि शुश्रूषा तस्य वा वचनक्रिया॥

**16. अधोलिखितयोः द्वयोः श्लोकयोः एकस्य श्लोकस्य सप्रसङ्ग-भावार्थः लेख्यः। 3**

(क) नाहमर्थपरो देवि! लोकमावस्तुमुत्सहे।
विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितम्॥

(ख) स्थाने भवानेकनराधिपः सन्, अकिञ्चनत्वं मखजं व्यनक्ति।
पर्यायपीतस्य सुरैर्हिमाशोः, कलाक्षयः श्लाघ्यतरो हि वृद्धेः॥

17. भवान् राजेन्द्रः, राजकीय-वरिष्ठोपाध्याय-संस्कृतविद्यालयः, सोमपुरस्य छात्रः। भवतः भगिनीविवाहकारणेन अवकाशाय प्रधानाचार्याय प्रार्थनापत्रं लिखतु।



BSER

अथवा

भवान् जयपुरनिवासी उदयोऽस्ति, इति चिन्तयित्वा नगरविकासाय नगरनिगमस्य अध्यक्षाय पत्रं लिखतु।

**खण्डः – 'द'**

**निबन्धात्मकाः प्रश्नाः -**

**18. अधोलिखितयोः गद्यांशयोः कस्यचिद् एकस्य सप्रसङ्ग-व्याख्या कार्या।** **4**

**(क)** वत्स! 'त्वं श्रृगालीसुतः'। कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात् त्वां श्रृगालं न जानीतः, तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव। नो चेत् आभ्यां हतो मृत्युपथं समेष्यति। सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः।

**(ख)** तत्र ये पौरास्ते तं तथा नीयमानं विलोक्य सविस्मयमिदमूचुः – 'अहो !' चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत। पश्यत। अथ तेषां कोलाहलमाकर्ण्य कम्बुग्रीव आह – भो ! किमेष कोलाहलः ? इति वक्तुमना अर्धोक्ते पतितः, पौरैः खण्डशः कृतश्च।

**19. एकस्याः कथायाः सारांशं संस्कृतभाषायां लिखत।** **4**

(क) काष्टभ्रष्टकच्छपकथा।

(ख) स्वर्णहंस-स्वर्णपक्षिराजकथा।

**20. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत।** **4**

(क) भारतीया संस्कृतिः।

(ख) मम प्रियः कविः।

(ग) वर्षप्रतिपदा (भारतीयनूतनवर्षम्)

BSER